# ॥ ब्रह्मणकृतं श्रीराधास्तोत्रम् ॥

ब्रह्मोवाच ।
हे मातस्त्वत्पदाम्भोजं दृष्टं कृष्णप्रसादतः ॥ १॥
सुदुर्लभं च सर्वेषां भारते च विशेषतः ।
षष्टिवर्षसहस्त्राणि तपस्तप्तं पुरा मया ॥ २॥
भास्करे पुष्करे तिर्थे कृष्णस्य परमात्मनः ।
आजगाम वरं दातुं वरदाता हरिः स्वयम् ॥ ३॥
वरंवृणीष्वेत्युक्ते च स्वाभिष्टं च वृतं मुदा ।
राधिकाचरणाम्होजं सर्वेषामपि दुर्लभम् ॥ ४॥
हे गुणातित मे स्न्हीघ्रमधुनैव प्रदर्शय ।
मयेत्युक्तो हरिरयमुवाच मां तपस्विनम् ॥ ५॥
दर्शायिष्याम्मि काले च वत्सेदानीं क्समेति च ।
न हीश्वराज्ञा विफला तेन दृष्टं पदाम्बुजम् ॥ ६॥
सर्वेषां वाञ्चितं मातर्गोलोके भारतेऽधुना ।
सर्वा देव्यः प्रकृत्यंशा जन्याः प्राकृतिका ध्रुवम् ॥ ७॥
त्वं कृष्णाङ्गार्धसम्भूता तुल्या कृष्णेन सर्वतः ।
श्रीकृष्णस्त्वमयं राधा वा हरीः स्वयम् ॥ ८॥
न हि वेदेषु मे दृष्ट इति केन निरूपितम् ।
ब्रह्माण्डाद्  बहिरूर्ध्वं च गोलोकोऽस्ति यथाम्बिके ॥ ९॥
वैकुण्ठशचाप्यजन्यश्च त्वमजन्या तथाम्बिके ।
यथा समस्तब्रह्माण्डे श्रीकृष्णांशांश जीविनः ॥ १०॥
तथा शक्तिस्वरूपा त्वं तेषु सर्वेषु संस्थिता ।
पुरुषाश्च हरेरंशास्वदंशा निखिलाः स्त्रियः ॥ ११॥
आत्मनो देहरूपा त्वमस्याधारस्वमेव हि ।
अस्या नु प्राणैस्त्वं मातस्वत्प्राणैरयमीश्वरः ॥ १२॥
किमहो निर्मितः केन हेतुना शिल्पकारिणा ।
नित्योऽयं च यथा कृष्णस्त्वं च नित्या तथाम्बिके ॥ १३॥
अस्यांशा त्वं त्वदंशो वाप्ययं केन निरूपितः ।
अहं विधाता जगतां वेदानां जनकः स्वयम् ॥ १४॥
तं पठित्वा गुरुमुखाद् भवन्त्येव बुधा जनाः ।
गुणानां वा स्तवानां ते शतांशं वक्तुमक्षमः ॥ १५॥
वेदो वा पण्दितो वान्यः को वा त्वां स्तोतुमीश्वरः ।
स्तवानां जनकं ज्ञानं बुद्धिर्ज्ञानाम्बिका सदा ॥ १६॥

त्वं बुद्धेर्जननी मातः को वा त्वां स्तोतुमीश्वरः ।
यद्वस्तु दृष्टं सर्वेषां तद्विवक्तुं बुधः क्समः ॥ १७ ॥
यददृष्टाश्रुतं वस्तु तन्निर्वक्तुं च कः क्षमः ।
अहं महेशोऽनन्तश्च स्तोतुं त्वां कोऽपि न क्षमः ॥ १८ ॥
सरस्वती च वेदाश्च क्समः कः स्तोतुमीश्वरि ।
यथागमं यथोक्तं च न मां निन्दितुमर्हसि ॥ १९ ॥
ईस्वराणामीस्वरस्य योग्यायोग्ये समा कृपा जनस्य ।
प्रतिपाल्यस्य क्षणे दोषः क्षणे गुणः ॥२० ॥
जननी जनको यो वा सर्वं क्समति स्नेहतः ।
इत्युक्त्वा जगतां धाताअ तथौ च पुरतस्तयोः ॥ २१ ॥
प्रणम्य चरणाम्भोजं सर्वेसःआं वन्द्यमीप्सितम् ।
ब्रह्मणा च कृतं स्तोत्रं त्रिसंध्यं यः पठेन्नरः ।
राधामाधवयोः पादे भक्तिं दास्यं लभेद् ध्रुवम् ॥ २२ ॥
कर्मनिर्मूलनं कृत्वा मृत्युं जित्वा सुदुर्जयम् ।
विलङ्घ्य सर्वलोकाश्च याति गोलोकमुत्तमम् ॥ २३ ॥
॥ इति श्रीब्रह्मवैवर्ते ब्रह्मण कृतं श्रीराधास्तोत्रं सम्पुर्णं ॥

---

Encoded by Daniel Mohanpersad danielmohanpersad98@msn.com

---

Please send corrections to sanskrit@cheerful.com
Last updated September 11, 2002